International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 88-95
© 2025 IJMH
www.themultijournal.com
Received: 14-08-2025
Accepted: 23-08-2025
Publish : 25-08-2025

**डॉ. अतुल ज्ञानोबा मस्के**
संशोधक, Editorial Assistant,
Deccan College PG&RI,
Pune

**Correspondence:**
**डॉ. अतुल ज्ञानोबा मस्के**
संशोधक, Editorial Assistant,
Deccan College PG&RI,
Pune

# कणादरहस्ये वर्णितानां सप्तपदार्थानामालोचनात्मकमध्ययनम्

**डॉ. अतुल ज्ञानोबा मस्के**

**निबन्धसारः-** पद्मनाभमिश्रः प्रशस्तपादाभिमतसिद्धान्ताविरुद्धत्वेन सप्तपदार्थनिरूपणार्थं प्रवृत्तः। तत्र सप्तपदार्थेषु यत्र यस्य पदार्थस्य वृत्तिः तन्निरूपणाय यतते सः। सप्तपदार्थनिरूपणावसरेऽत्यन्तलाघवेन पदार्थनिरूपणमकरोत् पद्मनाभाचार्यः। अस्मिन् शोधनिबन्धे काणादानुयायिनां मते पदार्थव्यवस्थाविचारः, अन्यदार्शनिकपदार्थव्यवस्थाविचारः, तथा च कणादरहस्ये वर्णितानां पदार्थानामालोचनात्मकोऽभ्यासः क्रियते।

**कूटशब्दाः-** पदार्थः, संसर्गाभावः, उत्तराभावः, द्रव्यत्वम्, भावत्वम्, अखण्डोपाधिः, सामान्यम्, विशेषः, समवायः इत्यादि शब्दा निबन्धेऽस्मिन् प्रामुख्यं भजते।

काणादानुयायिनां मते जगति विद्यमानानां सर्वेषां ज्ञेयाभिधेयपदार्थानां प्रशस्ततया सप्तसु पदार्थेष्वेवान्तर्भावो भवति। अतः सप्तपदार्थानां ज्ञानं प्रस्तुतं भवति। यथा डॉ. गङ्गानाथ झा महोदयानां प्रतिपादनं वर्तते- एतेषां वैशेषिकाभिमतसप्तपदार्थानां निरूपणं नाम समग्रजगत एव विश्लेषणम्। [1]कार्ल पॉटरमहोदयस्यापि एतदेव मतमस्ति- एते सप्तपदार्था यथार्था व्यावहारिकाश्च सन्ति तेभ्य एवान्यत् सर्वं कार्यं निर्मितं भवति।[2] वैशेषिकपदार्थानां विचारे आदौ द्रव्यम् गुणः कर्म एते त्रय एव पदार्था आसन्नित्येकं मतम्। षट्पदार्थप्रतिपादकं सूत्रं प्रक्षिप्तमस्तीति तेषां मतम्। ग्रन्थान्तरे षट्पदार्थप्रतिपादकसूत्रस्य व्याख्यानाभावात्।[3] आदौ पदार्थाः त्रयो वा षडिति निर्णयो तदा स्यात् यदा प्रशस्तपादभाष्यात् प्राचीनं किमपि व्याख्यानम् उपलभ्येत। अभावोऽपि पदार्थत्वेन वैशेषिकसूत्रे न प्रसिद्धः कालान्तरेण दशपदार्थीकारेण मतिचन्द्रेण अयं विषय आरब्ध इति भाति। समानतन्त्रे न्यायदर्शने यद्यपि षोडशपदार्था निरूपितास्तथापि तेषां सप्तस्वेवान्तर्भावो भवति। आचार्यपद्मनाभेन एतेषां षोडशपदार्थानामन्तर्भावो ग्रन्थान्तरे सेतुटीकायां कृतः।[4] एवं च अनयोर्बहु विप्रतिपत्तिरपि नास्ति। तदुक्तं मुक्तावल्यां – एते च पदार्था वैशेषिकनये प्रसिद्धा नैयायिकानामप्यविरुद्धाः, प्रतिपादितं चैतद्भाष्ये इति। दर्शनान्तरे केचन सप्तातिरिक्तं पदार्थं स्वीकुर्वन्ति केचन सप्तापेक्षया न्यूनत्वम् अङ्गीकुर्वन्ति। अतः तेषां खण्डनं कृत्वा पदार्थेषु सप्तत्वमेव न न्यूनत्वं नातिरिक्तत्वमिति कणादरहस्यकारस्यापि मतम्।

## अ) मीमांसकमतम्

भाट्टमीमांसकाः पञ्च पदार्थान्नेव आद्रियन्ते। तद्यथा— द्रव्यम्, सामान्यम्, गुणः, कर्म, अभावोऽनुपलब्धिर्वेति। तद्यथा-

**वयं तावत् प्रमेयं तु द्रव्यजातिगुणक्रियाः। अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे॥**[5]

एतेषां मते विशेषस्य अतिरिक्तपदार्थकल्पनं मास्तु सामान्यमेक एव पदार्थो भवतु। तथा च स्वरूपसम्बन्धेनैव समवायस्य प्रयोजनं सिध्यति अतः सोऽपि पृथक् पदार्थत्वेन मास्तु इति। तथा सति द्रव्यम्, गुणः, कर्म, सामान्यम्, अभावः एते पञ्च एव पदार्थाः इति। प्राभाकरमीमांसकाः द्रव्यम्, गुणः, कर्म, सामान्यम्, समवायः, शक्तिः, सादृश्यम् तथा च सङ्ख्या इति अष्ट पदार्थान् अङ्गीकुर्वन्ति।

## ब) वैशेषिकदर्शने सप्तातिरिक्तपदार्थानां खण्डनम्

वैशेषिकग्रन्थेषु शक्तिसादृश्ययोः पदार्थत्वरूपेण खण्डनं बहुत्र दृश्यते। तत्र शक्तिः न पदार्थान्तरं किन्तु द्रव्यादिस्वरूपमेव इति सिद्धान्तिनां मतम्। तथा च सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोऽसाधारणधर्मवत्त्वमेव। मुक्तावलीकारस्यापि एतदेव मतम्। किन्तु समग्रवैशेषिकपरम्पराया विचारः क्रियते चेत् तत्र पूर्वपक्षरूपेण बहवः पदार्था विचारिताः। नाम तस्मिन् समये सप्तातिरिक्तत्वेन पदार्थपरिकल्पनायाः प्रयासः तत्र तत्र कृतः। अतः सङ्क्षेपेण तदत्र विचार्यते-

**१) वल्लभाचार्यः- (इ.स. ११००-११५०)**

**न्यायलीलावती**कारेण वल्लभाचार्येण षट् पदार्थाः पूर्वपक्षरूपेण वर्णिताः। तथा च निराकृता अपि। ते च पदार्थाः- तमः, शक्तिः, ज्ञातता, वैशिष्ट्यम्, आधाराधेयभावः, सादृश्यम्, इत्यादि। तथा च ग्रन्थकारेण एतेषां पदार्थान्तरत्वं निराकृत्य षडेव भावपदार्थाः इति साधितम्।[6] एतदतिरिच्य शङ्करमिश्रस्य न्यायलीलावती-कण्ठाभरणव्याख्यायां स्वत्त्व इति पदार्थस्यापि अतिरिक्तपदार्थत्वं खण्डितम्।[7]

**२) शिवादित्यः (इ.स. ११००-११५०)**

**सप्तपदार्थी**कारेण शिवादित्येनापि अन्येषां पदार्थानां सप्तसु एव अन्तर्भावः कृतः। तद्यथा- मध्यत्वं परत्वापरत्वाभावः। अन्धकारोऽप्यभावः एव। शक्तिर्द्रव्यादिस्वरूपमेव। वैषिष्ट्यं तु विशेषण-विशेष्यसम्बन्धः। ज्ञातता ज्ञानविषयसम्बन्धः एव। सादृश्यम् उपाधिरूपं सामान्यम्। लघुत्वं गुरुत्वाभावः। एवमन्यस्यापि पदार्थस्य सतोऽत्रैव अन्तर्भावः।[8] नाम शिवादित्येनापि पूर्वपक्षरूपेण सप्तातिरिक्तसप्तपदार्थाः वर्णिताः खण्डिताश्च।

**३) वादिवागीश्वरः (इ.स. १२००)**

**मानमनोहर**कारेण वादिवागीश्वरेण तमसः अभावेऽन्तर्भावं कृत्वा शक्तिः, ज्ञातता, विशिष्टता, विषयविषयीभावः, सादृश्यम्, प्रधानम् (साङ्ख्यसम्मतः पदार्थः) इत्येते पदार्थाः उल्लिखिताः खण्डिताश्च।[9]

**४) रघुनाथशिरोमणिः (इ.स.१४७७ )**

**पदार्थतत्त्वनिरूपण**कारेण रघुनाथेन द्रव्यम्, गुणः, कर्म, सामान्यम्, समवायः तथा च अभावः इत्येते षट् पदार्थाः एव स्वीकृताः। तत्र तेषाम् उपभेदानामपि तत्र तत्र खण्डनं कृतवान्। यथा द्रव्येषु षडेव द्रव्याणि स्वीकरोति। अनेन क्षणम्, स्वत्त्वम्, शक्तिः, कारणत्वम्, कार्यत्वम्, सङ्ख्या, वैशिष्ट्यम्, विषयता, एते अष्ट पदार्थाः अतिरिक्तत्वेन अङ्गीकर्तव्याः इत्यपि प्रतिपादितम्।[10]

**पद्मनाभमिश्रेण** पूर्वपक्षरूपेण तत्र तत्र वर्णिताः त्रयोविंशतिपदार्थाः(२३) पूर्वपक्षरूपेण प्रशस्तपादभाष्यस्य सेतुटीकायाम् उल्लिख्य खण्डिताः। ते च यथा- भेदः, शक्तिः, शुद्धिः, अशुद्धिः, भावना, स्वत्त्वम्, क्षणिकः, वैशिष्ट्यम्, समूहः, प्रकारित्वम्, सङ्ख्या, सादृश्यम्, तारत्वम्, मन्दत्वम्, आधाराधेयभावः, व्यञ्जनावृत्तिः, स्फोटः, संसर्गमर्यादा, लिङ्गम्, विशेषण-विशेष्यभावः, कारणत्वम्, स्वरूपसम्बन्धः, तत्तेदन्ता इत्यादि।

**क) पद्मनाभमिश्राभिमतपदार्थनिरूपणम्**

आचार्यपद्मनाभविरचितः राद्धान्तमुक्ताहारग्रन्थः तथा चास्य स्वोपज्ञं व्याख्यानमेतदुभावपि ग्रन्थावद्यावधि अप्रकाशितौ स्तः। उभावपि ग्रन्थौ सम्पादितौ शीघ्रमेव प्रकाशितौ भविष्यतः। एकाशीतिकारिकात्मकस्य राद्धान्तमुक्ताहारग्रन्थस्य कणादरहस्यमिति व्याख्यानं वर्तते। न्यायवैशेषिकजगति न्यायसिद्धान्तमुक्तावलीसदृशः अयं षोडशशताब्द्यां विरचित एकः स्वोपज्ञः स्वतन्त्रश्च ग्रन्थः अस्ति। मूलग्रन्थः पद्यात्मकः अस्ति तस्य नाम राद्धान्तमुक्ताहार[11] इति। अस्य ग्रन्थस्य टीकाया नामास्ति कणादरहस्यम्[12] इति। अस्मिन् ग्रन्थे सप्तातिरिक्तपदार्थानां खण्डनं कृत्वा सप्तपदार्थवर्णने ग्रन्थकारस्य प्रवृत्तिः दृश्यते। पद्मनाभमिश्रः प्रशस्तपादाभिमतसिद्धान्ताविरुद्धत्वेन सप्तपदार्थनिरूपणार्थं प्रवृत्तः। तत्र सप्तपदार्थेषु यत्र यस्य पदार्थस्य वृत्तिः तन्निरूपणाय यतते।

**यत्र यस्य पदार्थस्य वृत्तिस्तत्प्रोच्यते मया।**
**प्रशस्तपादसिद्धान्तो विरुद्धो न यथा भवेत्॥४॥**
**पदार्थो द्विविधः प्रोक्तो भावाभावप्रभेदतः।**
**द्रव्यादिभेदतः षोढा प्रथमे द्विविधः परः॥५॥**
**अन्योऽन्याभावसंसर्गाभावभेदात्परस्त्रिधा।**
**प्रागभावोत्तराभावः सर्वथाभावभेदतः॥६॥**[13]

एताभिः कारिकाभिः सप्तपदार्थानाम् उद्देश्यत्वेन बोधो भवति। तत्रादौ भावाभावभेदतः पदार्थो द्विविधः। द्रव्यादिभेदतः इत्यत्र आदिपदेन्न गुणकर्मसामान्यविशेषसमवायाः ग्राह्याः। आहत्य षोढा भावपदार्थाः भवन्ति। द्विविधः परः नाम अभावो द्विधा संसर्गान्योन्याभावभेदतः। तत्रादौ भावपदार्थस्य सम्पूर्णं विस्तारं कृत्वा अभावपदार्थस्य विस्तारः क्रियते-

**भावत्वम्**

पदार्थाः द्विविधाः भावाः अभावाश्च। तत्र अभावत्वं नाम किञ्चित् वक्तुं न शक्यते इत्यतः अखण्डोपाधिः इत्यभिहितम्, परन्तु भावत्वं वक्तुं शक्यते न वा इति अत्र विचार्यते। यद्यपि अस्मिन् विषये दिनकर्यां समवायैकार्थसमवायान्यतरसम्बन्धेन सत्तावत्त्वं भावत्वमिति अभिहितम्।[14] तथापि समवायस्थले सत्तायाः अधिकरणे घटे कपालसमवायादीनां स्वरूपेणैव सम्बन्धात् तस्य निर्दुष्टत्वं वक्तुं न शक्यम्, न च स्वरूपस्यापि निवेशेन अन्यतमसम्बन्ध उच्यतामिति वाच्यम्, तदा तु अभावस्यापि तत्त्वेनातिव्याप्तेः। एतस्मिन् विषये किञ्चिद्विस्तरेणैव आचार्यपद्मनाभः लक्षणानि विमृशति।

तथाहि किं नाम भावत्वम्? यदि अभावाविषयकज्ञानविषयत्वं भावत्वमिति अभिधीयते तदा सामान्यादीनां सङ्ग्रहाय अभावाविषयकज्ञानं सामान्यज्ञानमिति वाच्यम्, तदा च सामान्यस्य अभावघटितत्त्वात् तज्ज्ञानविषयत्वमभावेऽपि गतमिति अभावे अतिव्याप्तिः स्यात्। यतो हि सामान्यं नाम नित्यत्वे सति अनेकसमवेतत्वम्। नित्यत्वं नामात्यन्ताभावाप्रतियोगित्वम्। अप्रतियोगित्त्वं नाम प्रतियोगित्त्वाभावः।[15] अथ च यस्य पदार्थस्य कस्यापि ज्ञानं नास्ति तत्र भावत्वानुपपत्तेः। न च ऐश्वरं तत् इति वाच्यम्, तस्यैक्येन अभावाविषयकत्त्वाभावात्। सर्वदाभावाविषयक-ज्ञानविषयत्वमिति लक्षणमिति उच्यमानेऽपि न गतिः अस्मदादिज्ञानस्य सर्वदा अविद्यमानत्त्वात्, ईश्वरज्ञानस्य च एकत्त्वेन अभावाविषयकत्वस्यासम्भवात्[16] अभावभिन्नत्वं भावत्वमिति केचन वदन्ति। तदपि न युक्तम्, यतो हि तथा सति भाव इतरेभ्यो भिद्यते अभावभिन्नत्त्वात् इत्यनुमानस्य पक्षतावच्छेदकस्य हेतोश्चैक्यापत्तेः साध्याविशेषश्च स्यात्, तथा च पक्षज्ञाने स्वत एव साध्यस्य ज्ञानसम्भवात् साध्यसन्देहाभावेन अनुमित्यनुदयापत्तिः[17] भावत्त्वप्रकारकज्ञानविषयत्त्वं भावत्त्वमिति चेत् ज्ञानस्य भ्रमप्रमासाधारण्येन भावत्त्वप्रकारकत्त्वस्य कदाचिदभावेऽपि सत्त्वेन अतिव्याप्तेः[18] न वा भावत्त्वाप्रकारकप्रमाविषयत्त्वं भावत्त्वमिति वाच्यम्, तदा भावत्वस्यैव सम्भवात् तस्यैवाप्रतिपादनेन

आत्माश्रयापत्तेश्च।[19] न वा जातिः भावत्वम्, सामान्यादौ अपि सत्त्वात्। न वा भावशब्दवाच्यत्वम्, भावत्वेऽपि सत्त्वात्, न वा प्रागभावाश्रयत्वं ध्वंसाश्रयत्वं वा तत् ध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिदेशवृत्तित्वेन द्रव्ये एव सत्त्वस्याङ्गीकारादिति चेत् तत्र सिद्धान्ते भावत्वलक्षणमभिधीयते

**अन्योन्याभाववैशिष्ट्यमथवाभावयोगिता।**
**अत्यन्ताभावयोगो वा भावत्त्वं व्यर्थता न च॥**
**अखण्डत्त्वान्न चान्यत्र प्रसङ्गोऽन्योन्यसंश्रयात्।**
**आत्माश्रयादेर्वाव्याप्तेः प्रागभावादिनैव तत्**[20]

अस्याशयः अन्योन्याभाववत्वम्, अत्यन्ताभाववत्त्वमेव वा भावत्त्वम्। ननु अभावः अभावेऽपि विद्यते यथा पटाभावे घटाभावः, इति प्रतीतिः भवति। अत एव हि गुणात्यन्ताभावानधिकरणत्वं द्रव्यत्वमिति लक्षणं युज्यते अन्यथा अभावस्य अभावेऽप्यभावेन अभावेऽपि तस्य लक्षणस्य गमनात् दोषापत्तिः। पटाभावे घटो नास्ति इति प्रतीतेश्च इति चेत्, घटाभावे पटाभावः, तत्रैव च पटाभावे स एव घटाभावः इत्यङ्गीकारे अन्योन्याश्रयापत्तेः। तथा न पटाभावे पटो नास्ति इत्यभिधीयमाने तस्यैव तदाश्रयत्त्वात् आत्माश्रयापत्तेः, पटाभावे मठाभावादीनां स्वीकारे अनन्तपदार्थकल्पनाधारायाः विश्रान्त्यभावेन अनवस्थापत्तेः। अतः अभावाधिकरणाभावस्य अधिकरणरूपत्वस्वीकारेण अभावस्याधिकरणं सर्वोऽपि भावपदार्थः एव भवति इत्यतः भावत्वं नाम मुख्याभावाश्रयत्त्वम्। गौणाभावस्य अधिकरणरूपत्त्वाङ्गीकारेण मुख्यपदं निवेशितमिति पद्मनाभाचार्याः।[21]

**भावपदार्थानां लक्षणविचारः**[22]

**द्रव्यादीनां द्रव्यतादि लक्षणत्वेन कीर्तितम्।**
**द्रव्यकर्मगुणत्वानि जातयस्तत्र कीर्तिताः॥७३॥**

अनया कारिकया ग्रन्थकारः द्रव्यगुणकर्मणां द्रव्यत्व-गुणत्व-कर्मत्वमिति जातिघटितं लक्षणं निरूपयति। तथा च सामान्यस्य विशेषस्य समवायस्य च पृथक् लक्षणं करोति तेषु जातेः अवृत्तित्वात्। सर्वेषां पदार्थानां क्रमशः लक्षणं पश्यामः।

**१) द्रव्यम्**

सप्तपदार्थेषु प्रथमः प्रधानः च पदार्थः भवति द्रव्यम्। महर्षिकणादेन क्रियावत्त्वम्, गुणवत्त्वम्, समवायिकारणत्वमिति द्रव्यस्य लक्षणं प्रतिपादितम्।[23] अत्र विज्ञानवादिभिः बौद्धैः द्रव्यपदार्थखण्डनार्थं नैकाः युक्तयः प्रदर्शिताः।[24] पद्मनाभः द्रव्यस्य द्रव्यता इति लक्षणं द्रव्यत्वं च जातिरिति कथयति। नाम सर्वेषु द्रव्येषु विद्यमानः कश्चिदनुगतः एकः धर्मः इत्यर्थः। अतः लक्षणपरिष्कारो भवेत्-समवायसम्बन्धावच्छिन्नद्रव्यत्वावच्छिन्नद्रव्यनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं द्रव्यस्य लक्षणम्। किमनेन लक्षणेन नूतनं साधितमिति प्रश्ने। अनेन केवलं द्रव्ये एव समवायिकारणता भवतीति निष्पन्नं भवति। तथा च कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिर्भवतीति मुक्तावलीकारः।[25] न्यायवैशेषिक-परम्परायां जातिघटितलक्षणस्य एकः प्रकारः दृश्यते। द्रव्यलक्षणे अयं प्रकारः प्रशस्तपादभाष्ये, व्योमवत्याम्, सेतौ[26] किरणावल्याम्, सूक्तौ, सप्तपदार्थ्यादिषु सर्वत्र दृश्यते। यत्र जातिबाधकं किमपि न भवेत् तत्र तत्र पद्मनाभेन जातिघटितान्येव लक्षणानि कृतानि। अत्यन्तसङ्क्षेपतया पदार्थानां लक्षणकथनमत्र विद्यते। पदार्थान्तरेऽपि एवमेव विचारः कर्तव्यः। द्रव्याणि च पृथिव्यप्तेजोवाय्वाकाश-कालदिगात्ममनांसि नवैव। इति सङ्क्षेपः।

तत्र पृथिव्यादीनां[27] लक्षणविचारः-

**पृथिव्यादेर्धरात्वादिलक्षणं तत्र कालताम्।**
**नभस्त्वदिक्त्वे सन्त्यज्य गमनत्वान्तजातयः॥७८॥**

आकाशम्, कालः, दिक् चेति त्रीणि द्रव्याणि विहाय पृथिवीप्रभृति गमनपर्यन्तं तत्तत्पदार्थनिष्ठो पृथिवीत्वादि गमनत्वं चेति धर्मः जातिर्भवतीति ज्ञेयम्। तदेव तेषां पदार्थानां लक्षणं च ज्ञेयम्। अत्र श्लोकाधारेण जातिघटितानां लक्षणानां सारणी एवं ज्ञातुं शक्या। तदुत्तरं सङ्क्षेपेण लक्षणानां विवरणं च क्रियते।

| पदार्थाः | लक्षणानि | पदार्थाः | लक्षणानि |
|---|---|---|---|
| पृथिवी (धरा) | धरात्वं | द्रवत्वम् | द्रवत्वं |
| जलम् | जलत्वं | स्नेहः | स्नेहत्वं |
| तेजः | तेजस्त्वं | शब्दः | शब्दत्वं |
| वायुः | वायुत्वं | बुद्धिः | बुद्धित्वं |
| मनः | मनस्त्वं | सुखम् | सुखत्वं |
| आत्मा | आत्मत्वं | दुःखम् | दुःखत्वं |
| रूपम् | रूपत्वं | इच्छा | इच्छात्वं |
| रसः | रसत्वं | द्वेषः | द्वेषत्वं |
| गन्धः | गन्धत्वं | प्रयत्नः | प्रयत्नत्वं |
| स्पर्शः | स्पर्शत्वं | धर्मम् | धर्मत्वं |
| सङ्ख्या | सङ्ख्यात्वं | अधर्मम् | अधर्मत्वं |
| परिमाणम् | परिमाणत्वं | संस्कारः | संस्कारत्वं |
| पृथक्त्वम् | पृथक्त्वं | उत्क्षेपणम् | उत्क्षेपणत्वं |
| संयोगः | संयोगत्वं | अपक्षेपणम् | अपक्षेपणत्वं |
| विभागः | विभागत्वं | आकुञ्चनम् | आकुञ्चनत्वं |
| परत्वम् | परत्वं | प्रसारणम् | प्रसारणत्वं |
| अपरत्वम् | अपरत्वं | गमनम् | गमनत्वं |
| गुरुत्वम् | गुरुत्वं | | |

**पृथिवी-**

अनया कारिकया ज्ञायते यत् पृथिव्यादीनां धरात्वादिलक्षणं भवति। आदिपदेन जलतेजोवायूनां ग्रहणम्। जातिघटितमिदं लक्षणम्। पृथिवीत्वाभिसम्बन्धात् पृथिवीति प्रशस्तपादाचार्याः।[28] अस्यैव परिष्कृतं लक्षणं भवति गन्धसमानाधिकरणद्रव्यत्वव्याप्य-जातिमत्त्वमिति।[29]

**जलम्-**

अप्स्वाभिसम्बन्धादाप इति प्रशस्तपादाचार्याः।[30] ग्रन्थकारस्तु जलत्वमिति जलस्य लक्षणमकथयत्। मुक्तावलीकारस्तु[31] स्नेहत्वा-वच्छिन्नकार्यतानिरूपितकारणतावच्छेदकत्वेन जलत्वजातिं साधयति।

**तेजः-**

तेजस्त्वाभिसम्बन्धात्तेज इति प्रशस्तपादाचार्याः।[32] तेजस्त्वजाति-योगी उष्णस्पर्शवत्तेज इति शिवादित्यः।[33] पद्मनाभस्तु तेजस्त्वमिति तेजसः लक्षणं प्राह। मुक्तावलीकारेण तेजस्त्वजातेः सिद्धिः उष्णस्पर्श-वत्त्वहेतुना कृता।[34]

**वायुः-**

वायुत्वाभिसम्बन्धाद्वायुः। स च अनुमेयः स्पर्शशब्दधृतिकम्पलिङ्गादिति प्रशस्तपादाचार्याः।[35] पद्मनाभाचार्यास्तु वायुत्वमिति वायोः लक्षणमकथयत्।

**आकाशम्-**

आकाशस्य विषये तत्र तत्र दर्शनेषु मान्यता भिन्ना भिन्ना वर्तते। साङ्ख्यदर्शने आकाशं शब्दतन्मात्रोद्भूतं महाभूतं वर्तते। भाट्टमीमांसकानां मते आकाशम् एकं तत्त्वं वर्तते किन्तु तत् शब्दगुणस्य आश्रयं भवितुं नार्हति। शब्दस्यापि द्रव्यत्वात्। वेदान्तिनां मते आकाशं विवर्तमात्रम् अस्ति। जैनदर्शने आकाशं द्विधा-लोकाकाशम् आलोकाकाशं चेति। वैशेषिकदर्शने तु सर्वत्र शब्दाश्रयत्वेन आकाशस्य सिद्धिः कृता। इदं द्रव्यं पृथिव्यप्तेजोवायुभ्यः भिन्नं वर्तते। आकाशम् एकम्, विभुः, नित्यं च भवति।[36] पद्मनाभेन आकाशस्य लक्षणं शब्दसमवायिकारणत्वम् इति कृतम्। मुक्तावल्यां तु आकाशत्वं शब्दाश्रयत्वमिति लक्षणं कृतम् किन्तु अर्थस्तु समानमेव।

**कालः-**

महर्षि-कणादेन पदार्थानां कालिकाधारत्वेन कालनामकं द्रव्यं स्वीकृतम्। तत्साधनाय परत्वम् अपरत्वम्, क्षिप्रमिति लिङ्गान्यपि प्रोक्तानि।[37]तात्पर्यं कालनामकमेव तादृशम् आधारभूतं द्रव्यं भवति यत्र सर्वाः क्रियाः भवन्ति तासु च क्रियासु पौर्वापर्यं चिरत्वं क्षिप्रत्वमित्यादि निर्धारितं भवति। अत एव उच्यते सर्वाधारः काल इति। पद्मनाभेन कालत्वं मूर्त्तातिरिक्तपरत्वविशेषासमवायिकारण-संयोगाश्रयत्वम् इति लक्षणं कृतम्।

**दिक्-**

दिक् पूर्वापरादिप्रत्ययलिङ्गेति प्रशस्तपादानां वचनम्। दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते इति विश्वनाथ।[38] प्राच्यादिव्यवहारहेतुः दिगिति अन्नम्भट्टः। परत्वविशेषगर्भं दिक्त्वम्। दिशः विषये वैशेषिकदर्शनेऽपि विचारभिन्नतास्ति। रघुनाथशिरोमणिना पदार्थतत्त्वनिरूपणमिति ग्रन्थे यथा आकाशम्, कालः न पृथक् द्रव्यान्तरमिति प्रतिपादितम् तद्वदेव दिगपि पृथक् द्रव्यं नावश्यकमिति प्रतिपादितम्। ईश्वरोपाधिनैव सर्वाः कालदिक्सम्बद्धाः प्रतीतयः निरूपयितुं शक्याः। पृथक् पदार्थस्यापेक्षा नास्तीति।[39] सप्तपदार्थीकारेण शिवादित्येनापि आकाशं कालः दिक् एतानि पृथक् पृथक् द्रव्याणि न सन्ति अपि तु एकस्यैव द्रव्यस्य पक्षत्रयं सन्ति।[40]

**आत्मा-**

वैशिषिकदर्शनस्य महत्त्वपूर्णम् अष्टमं द्रव्यं भवति आत्मा। अस्य स्वरूपं तत्र तत्र दर्शनेषु विभन्नतया प्रतिपादितम्। तथापि आत्मतत्त्व-विषयकम् उद्योतकारस्य मतम् उल्लेखनीयं भवति। न कश्चिद्वादी आत्मसद्भावे प्रतिपद्यते, किन्तु विशेषे प्रतिपद्यते।[41] आत्मत्ववान् आत्मेति प्रशस्तपादाचार्याः।[42] किरणावल्यामपि उदयनाचार्याः एवमेव व्याख्यानम् अकरोत्। आत्मत्वसामान्यवानिति लौगाक्षि-भास्करः।[43] आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणता-वच्छेद-कतया सिध्यतीति मुक्तावलीकारस्य मतम्।[44] ज्ञानाधिकरणमात्मेति अन्नम्भट्टः। भाष्यकारेण आत्मनः यल्लक्षणं कृतं तदेव ग्रन्थकाराभिमतम्।

**मनः-**

प्रशस्तपादाचार्यैः मनसः मनस्त्वयोगान्मनः[45] इति लक्षणं कृतम्। वादिवागीश्वरेण स्वस्य मानमनोहरग्रन्थे मनसः षट् लक्षणानि कथितानि तानि ज्ञात्वा मनसः स्पष्टतया बोधो भवेत्। तद्यथा-

अ) स्पर्शरहितत्वे सति अणु मनः।

आ) विज्ञानसमवायिकारणसंयोगाधारत्वे सति मूर्तं वा।

इ) सुखग्राहकेन्द्रियं वा।

ई) अण्विन्द्रियं वा।

उ) ज्ञानाजनकसंयोगाश्रयं जडं मनः।

ऊ) ज्ञानासमवायिसंयोगाश्रयम् इन्द्रियं वा।[46]

भाष्यकारेण मनसः यल्लक्षणं कृतं तदेव ग्रन्थकाराभिमतम्।

**२) गुणः-**

**द्रव्यकर्मगुणत्वानिजातयस्तत्र कीर्तिताः।** अनेन गुणानां गुणता लक्षणं गुणत्वं च जातिरिति ज्ञातव्यम्। ते च रूपरसादयः चतुर्विंशतिः। तत्र तत्र रूपत्वादयः जातयः ज्ञेयाः। प्रसिद्धत्वात् नेह तन्यन्ते।

**३). कर्म-**

कर्मणां कर्मता लक्षणं कर्मत्वं च जातिरिति ज्ञेयम्। तच्च उत्क्षेपणादिभेदतः पञ्चधेति प्रसिद्धम्।

**४) सामान्यम्-**

नित्यत्वे सत्यनेकसमवेतत्वं सामान्यत्वम् इति सामान्यस्य लक्षणम्। यथा गोषु विद्यमानं गोत्वम्। गोत्वे नित्यत्वं वर्तते, सर्वासु गोषु समवायेन विद्यमानत्वात् अनेकसमवेतत्वं चास्ति तस्मात् लक्षणसमन्वयः। ग्रन्थकारेण सामान्यस्य अत्यन्तं सङ्क्षेपतया लक्षणं प्रतिपादितम्। अत्र एवम् अवधारणीयम्। सामान्यं द्विप्रकारकं भवति जातिरूपम् उपाधिरूपं च। तत्र जातेः स्वरूपंनित्यमेकानुगतं सामान्यम्। सत्ताद्रव्यगुणकर्मत्वादिः। उपाधिश्च पाचकत्वादि[47] जात्युपाध्योः भेदसम्पादनार्थं वैशेषिकदर्शने बहु आयासः कृतः दृश्यते। उदयनाचार्येण किरणावल्यां जातिबाधकानि षट् कारणानि उक्तानि। तेषु साङ्कर्यस्यैव किञ्चिद्विस्तिरेण वर्णनमत्र क्रियते। तदुत्तरम् उपाधेः वर्णनं क्रियते। कणादरहस्ये प्रमालक्षणस्य निरूपणवेलायां प्रमात्त्वं जातिः चेत् अनुमितौ प्रमात्त्वमस्ति प्रत्यक्षत्वं नास्ति, भ्रमप्रत्यक्षे च प्रत्यक्षत्वमस्ति प्रमात्वं नास्ति इति उभयोः प्रमात्मकप्रत्यक्षे समावेशात् जातिसाङ्कर्यं दोषः समापतति इत्यभिहितम्। तत्र जातिसाङ्कर्यस्य जातित्वबाधकत्वमिति प्राचीनाः तस्य अबाधकत्वमिति नवीनाः इदं मतद्वयमपि अत्र विमृश्यते।

**प्राचीनाः-**

जातेः साङ्कर्यं जातिसाङ्कर्यम्। जातेः बाधकेषु एकः अन्यतमः दोषः भवति साङ्कर्यम्। तद्यथा-

**व्यक्तेरभेस्तुल्यत्वं सङ्करोऽथानवस्थितिः।**

**रूपहानिरसम्बन्धात् जातिबाधकसङ्ग्रहः॥**[48]

साङ्कर्यं नाम हि परस्परात्यन्ताभावसमानाधिकरणयोः धर्मयोरेकत्र समावेशः। यथा भूतत्त्वमूर्तत्त्वयोः मध्ये भूतत्त्वं न जातिः अपि तु मूर्तत्त्वम्। यतो हि मूर्तत्त्वं विहाय भूतत्त्वम् आकाशे विद्यते, भूतत्त्वं विहाय मूर्तत्त्वं हि मनसि विद्यते, उभयोः समावेशः पृथिव्यादिचतुष्टये

विद्यते इति उभयोः मध्ये एकस्यैव जातित्त्वम्, इत्यतः क्रियासमवायिकारणतावच्छेदकतया सिद्धस्य मूर्तत्त्वस्यैव जातित्वं विद्यते न तु भूतत्त्वस्य इति।

ननु साङ्कर्यस्य जातिबाधकत्वं कुतः? नाम साङ्कर्यमस्तु जातित्वमप्यस्तु इति चेत् एकत्र पदार्थे समाविष्टयोः व्याप्यव्यापकभावानापन्नयोः जात्योरनङ्गीकार एव हेतुः। अत एव उक्तं दिनकर्यां स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्योभय-सम्बन्धेन जातिविशिष्ट-जातित्त्वावच्छेदेन स्वसमानाधिकरणा-भावप्रतियोगित्त्वाभाव इति नियमस्य भङ्गप्रसङ्ग एव अत्र हेतुः[49] इति। यदि भूतत्वमपि जातिः स्यात् तदा तादृशोभयसम्बन्धेन तद्विशिष्टमूर्तत्त्वस्य स्वाधिकरणाकाशवृत्तिमूर्तत्त्वाभावप्रतियोगित्व-मेवास्तीति नियमस्य भङ्गापत्तिः स्यात्। अतः साङ्कर्यं जातिबाधकमिति बोध्यम्। नवीनानां मते जातिसाङ्कर्यं न दोषाय। यतो हि जात्योः साङ्कर्यं यदि सिद्धं तदापि तस्य दूषणत्वं तु असिद्धमेव। यदि च जात्योः साङ्कर्यं न सिद्धं तदा तु स्वरूपासिद्धेरेव तस्य दूषणत्वाभावः। ननु यदि जातिसाङ्कर्यं स्यात् घटत्वपटत्वयोरपि एकत्र समावेशः स्यादिति आपादकेन तस्य दूषणत्वमभिधीयते इति चेत्, जात्योः साङ्कर्यस्यैव साधनीयत्वेन आपादकस्याप्रसिद्धिरेव। ननु जातिसाङ्कर्यं भूतत्वमूर्तत्वयोः विद्यते, इति यदि तयोः जातित्त्वं स्यात्तर्हि घटत्वपटत्वयोरपि सामानाधिकरण्यं स्यादिति चेत् भूतत्त्वमूर्तत्त्वयोः सामानाधि-करण्यमप्यस्ति इत्यतः तत्त्वेऽपि अनयोस्तु सर्वथा वैयधिकरण्यात् समावेशाभावः। अतः आपाद्यं किमपि नास्ति अपि तु इदमेव वक्तुं शक्यते यत् परस्परात्यन्ताभावसमानाधिकरणयोः जात्योरेकत्र समावेशः नेष्ट इति तत्र च बीजाभावात् न साङ्कर्यं जातिबाधकमिति सिद्धम्। इदमेवाभिप्रेत्य दिनकर्यामपि तादृशानियमे मानाभावान्न साङ्कर्यं जातिबाधकमिति नव्याः[51] इत्यभिहितम्।

**उपाधिवर्णनम्-**

**यत्र यस्य पदार्थस्य वृत्तिस्तत्प्रोच्यते मये**ति लेखनाद् ज्ञायते यत् सर्वे पदार्थाः कुत्रचित् वर्तन्ते। वैशेषिकपदार्थव्यवस्थायाम् आकाशादिकं[51] विहाय सर्वे पदार्थाः केनचित् सम्बन्धेन आधेयाः भवन्ति। नाम कस्यचित् आधारस्य धर्माः भवन्ति। उपाधिर्नाम धर्मः। स च धर्मः क्वचिज्जात्यादिः। क्वचित्तद्भिन्नोऽपि भवति। यथा— पदार्थविभाजकोपाधित्वमित्यादौ। पदार्थविभाजकोपाधयः तावत् द्रव्यत्व-गुणत्व-कर्मत्व-सामान्यत्व-विशेषत्व-समवायत्व-अभावत्वरूपाः सन्ति। यदि पदार्थो द्विविधः भावाभावश्चेति। तदा तु भावत्वाभावत्वे पदार्थविभाजकोपाधी। द्रव्यत्वादयः भावविभाजकाः। अभावविभाजकं च कस्यचिन्मते अन्योन्याभावत्वं संसर्गाभावत्वं च। संसर्गाभावविभाजकं प्रागभावत्वादि। कस्यचिन्मते तु अभावश्चतुर्विधः प्रागभावादिभेदात् तथा च प्रागभावत्वादयोऽभावविभाजकाः एव। अत्र येन रूपेण यस्य विभागः यस्य मते तस्यैव तस्य मते तद्विभाजकोपाधित्वादिति तात्पर्यम्।[52] तत्र पदार्थविभाजको-पाधि-स्थले वर्णिताः द्रव्यत्वादयो धर्माः जातिरूपाः। सामान्यत्वादयस्तु तद्भिन्नाः। नाम जातिभिन्नाः। जातिभिन्नो धर्मोऽपि द्विविधः ज्ञेयः। सखण्डोपाधिः अखण्डोपाधिश्चेति। तत्राद्यः भवति आकाशत्वादिः।[53] द्वितीयः प्रमेयत्वकुण्डिलित्व-प्रतियोगित्वादिः।[54] सखण्डोपाधिः बहुपदार्थ-घटितो धर्मः। स च क्लृप्तपदार्थेष्वन्तर्भवति। यथा-भावत्वम्, अभावत्वमित्यादि। न तु अखण्डोपाधिवत् सप्तपदार्था-तिरिक्तः पदार्थ इति विज्ञेयम्। अखण्डोपाधिः अनिर्वचनीयो धर्मः। स च सप्तातिरिक्तः पदार्थः। यथा- अनुयोगितात्वप्रतियोगितात्वविषय-तात्वादिः।[55] नव्यन्यायभाषाप्रदीपग्रन्थेऽपि अयं विचारः एवं प्रकारेण कृतः।

ग्रन्थकारेण वैधर्म्यसाधर्म्यप्रतिपादनार्थम् उपाधीनां नाम धर्माणां कथनमावश्यकम् इत्युक्त्वा उपाधयः ईरिताः। अनेन कथनेन उपाधेः प्रयोजनमपि ज्ञायते। एते उपाधयः पदार्थविभाजकाः भवन्ति। नाम सामान्यधर्मसाक्षाद्व्याप्यधर्माः। यथा ज्ञानविभाजकोपाधिर्भ्रमत्वं प्रमात्वं च। यथा वा द्रव्यविभाजकोपाधिः पृथिवीत्वजलत्वादिरिति।

सप्त पदार्थेषु अभावत्वम्, सामान्यत्वम्, विशेषत्वम्, समवायत्वम्, कालत्वम्, दिक्त्वम्, आकाशत्वं च विहाय तत् तत्पदार्थनिष्ठो धर्मः जातिर्भवतीति ज्ञेयम्।

**५) विशेषः-**

वैशेषिकस्य पञ्चमः पदार्थः विशेषः। अस्मादेव अस्य दर्शनस्य वैशेषिकदर्शनमिति सञ्ज्ञानम्। पदार्थानां भेदज्ञानं नाम अवयवीनां भेदज्ञानम् अवयवभेदाद्भवति। नित्यद्रव्याणां तत्रापि परमाणूनाम् अवयवाभावात् अयं परमाणुः अस्माद्भिन्नः इति वक्तव्ये किमपि साधनं न भवति। अतः विशेषपदार्थस्य कल्पनम्। नाम अवयवाभावात् परमाणोः भेदसाधनाय तत्र तत्र विद्यमानः कश्चित् विशेषनामकः पदार्थः कल्पितः। प्रशस्तपादाचार्येण तस्य लक्षणं कृतम्-नित्यद्रव्यवृत्तयो ह्यनन्ता विशेषाः। ते च खलु अनन्तव्या-वृत्तिहेतुत्वाद्विशेषाः एव। नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः इति। पद्मानाभाचार्यस्तु नित्यद्रव्यजातिशून्यत्वे सत्येकमात्रसमवेतत्वं विशेषत्वमिति लक्षणमकरोत्। एकसमवेतत्वं सामान्येऽपि। एकमात्रसमवेतत्वं रूपादावपि। जातिशून्यत्वं सामान्यादावपि अतः मिलितं तेनोक्तम्। जयरामभट्टाचार्येण पदार्थमालायाम् एतादृशमेव लक्षणं कृतम्। एकमात्रसमवेतत्वे सति सामान्यशून्यत्वमिति।

अत्र ग्रन्थकारेण विशेषपदार्थनिरूपणे विशिष्टः विचारः कृतः। सत्यपि विचारे परम्परापरिपालनं करोतीति वैशिष्ट्यम्। स चात्र सङ्क्षेपतः दीयते। विशेषस्यापि विभागः शक्यः इति ग्रन्थकारस्य विशिष्टं मतं तत्साधनाय युक्तिरपि प्रदर्शयति। विशेषो विभुवृत्तिः अविभुवृत्तिरिति विभागकरणे विशेषितविशेषत्वयोरेव विभाजकोपा-धित्वपर्यवसानात्। तस्माद् विभुवृत्तिविशेषत्वम् अविभुवृत्तिविशेषत्वं च विशेषविभाजकं पर्यवसन्नं भवति।[56] किन्तु विशेषे तु यद्यपि विभाजकोपाधिः सम्भवति तथापि कणभुङ्मुखविनिर्गता एव गण्यन्त इति न कोऽपि दोष इति सङ्क्षेपः।

**६) समवायः-**

कृष्णः घट इति वाक्यात् घटः कृष्णवर्णः तथा च तयोः कश्चित् सम्बन्धः ज्ञायते। विना सम्बन्धेन तत्र आधाराधेयभावः नोपपद्यते। स

च सम्बन्धः समवायः इति। स च सम्बन्धः संयोगादिभ्यः विलक्षणः। समवायः इति कथितम्।[57] अत एव सप्तपदार्थीकारेण नित्यसम्बन्धः समवाय इति कथितम्।[58] तत्र तत्र लक्षणानां विश्लेषणात् समवायस्य स्वरूपम् एवं भवेत्-

अ) समवायः कारणाधिष्ठितः।

आ) समवायः नित्यसम्बन्धः।

इ) समवायः एकः।

ई) संयोगादिभ्यः भिन्नः एकः पदार्थः।

उ) समवायः कुत्रापि समवेतो न भवति नाम समावायसम्बन्धेन न वर्तते किन्तु स्वरूपसम्बन्धेन वर्तते। समवायस्तु समवायरहितः सम्बन्धः।[59]

ऊ) समवायः अनुमेयः अस्ति।

ए) समवायः अवयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योः, विशेषनित्यद्रव्ययोश्च सम्बन्धः भवति।

पद्मनाभस्तुस्वातिरिक्तसम्बन्धसम्बद्धभिन्नत्वं समवायलक्षणम्। न चैतद् द्रव्यादौ गतम्, संयोगसमवायाभ्यां तस्य सम्बद्धत्वात्। अभावे नातिव्याप्तिः, तत्रान्योन्याभावाभावात्।

इति समवायविवेचनम्।

**७) अभावविचारः-**

संसर्गाभावस्य लक्षणं भवति तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताकाभाववत्त्वम्। स च त्रिधा- प्रागभावः उत्तराभावः अत्यन्ताभावश्चेति।

उत्पत्तेः प्राक् समवायिकारणे कार्यस्य संसर्गाभावः प्रागभावः। अयं च उत्पन्नस्य पदार्थस्यैव पुनः उत्पत्त्यापत्तिनिवारणार्थम् अवश्यं स्वीकार्यो भवति। पद्मनाभेनास्य लक्षणं नोक्तम् अन्यत्र प्रसिद्धत्वात्। विनाश्यभावत्वं प्रागभावलक्षणमिति मुक्तावलीकारः।

द्वितीयो भवति उत्तराभावः। तस्य ध्वंसः प्रध्वंसः इति नामान्तरम्। स च उत्पत्तिमान् अविनाशी भवति। पद्मनाभेनास्य उत्तराभाव इति सञ्ज्ञा कृता। ध्वंसप्रतियोग्युत्तरकाले जायमानत्वात्। सादिरनन्तः ध्वंसः। उत्पत्तिमत्त्वे सति नाशशून्य इत्यर्थः।

सर्वदाभावोऽत्यन्ताभावः। सर्वदा नाम त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताक इत्यर्थः। स च नास्तीति अनुभवसिद्धो नित्यः।

अन्योन्याभावः एक एव। स च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः अभावः। नित्यत्वे सति अत्यन्ताभावभिन्नत्वे सति अभावत्वम्।

अत्र प्रश्नः भवेत्, प्रशस्तपादाचार्यैः अभावपदार्थो साक्षान्न वर्णितः तर्हि कथमेवं प्रतिज्ञातं ग्रन्थकारेण? अस्य उत्तरं स्वयं ग्रन्थकर्त्रा स्वस्य सेतुटीकायां प्रदत्तम् अस्ति। तत्र अभ्युपगमसिद्धान्तत्वेन अभावपदार्थोभिमतः प्रशस्तपादाचार्याणाम्। यथा मनसः इन्द्रियत्वम् अभ्युपगमसिद्धान्तेन स्वीक्रियते तद्वत्। अभावस्य अभावत्वमेव लक्षणं तच्चाखण्डमेवेति ग्रन्थकारस्य मतम्। तत्कथमिति विस्तरेण पश्यामः-

**अभावलक्षणनिरूपणम्-**

अभावो हि पदार्थः भूतले घटो नास्ति, पटो नास्ति इत्यादिप्रतीत्या सर्वानुभवगोचरः मीमांसकैरधिकरणत्वेनाङ्गीकृतोऽपि, तादृशं पदार्थं अत एव कणादेन कारणे कार्यं विद्यते एतज्ज्ञानं यस्मात् भवति स वैशेषिका हि अतिरिक्तमङ्गीकुर्वन्ति। यतो हि यदि अभावः अधिकरणस्वरूपः स्यात् तर्हि भूतले घटाभाव इति प्रतीत्या यत् घटाभावभूतलयोः आधाराधेयभावः प्रत्याय्यते तद् विरुध्येत[60] यतो हि तदधिकरणत्वं प्रति तद्भिन्नत्वं प्रयोजकम्। घटाभावस्य भूतलरूपत्वे भूतले घटाभावः इत्यस्य भूतले भूतलमितितुल्यं बोधः स्यात् अतः अभावः न अधिकरणस्वरूपः इति निश्चीयते। अथ च यदि अभावः अधिकरणस्वरूपः तदा अनन्ताधिकरणानानां नास्तीति प्रतीतिविषयत्वे गौरवं स्यात्।[61] अथ च रसनेन्द्रियेण फलादिवृत्तिरसाभावस्य, घ्राणेन्द्रियेण फलादिवृत्तिगन्धाभावस्य च प्रत्यक्षं न स्यात्, रसनेन्द्रियस्य द्रव्याग्राहकत्वेन फलाग्राहकत्वात्।[62] अतः अभावस्य अतिरिक्तत्वं वाच्यमेव।

**विविधग्रन्थकाररीत्या अभावलक्षणानि**

यदि तु अतिरिक्तस्वरूपत्वं तस्य तर्हि लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति न्यायेन लक्षणं वाच्यम् अतः तानीह निरूप्यन्ते-

अ) तत्र पद्मनाभाचार्याः अभावत्वमेव[63] तस्य लक्षणमभिप्रयन्ति। तच्च अखण्डोपाधिरूपमिति तस्याशयः।

आ) मुक्तावलीकाराः द्रव्यादिषट्कान्योन्याभावत्वमभावत्वमि[64]ति अभिदधुः।

इ) नव्याः हि भावभिन्नत्वमभावत्वमाहुः।[65] तत्र भावत्वं नाम समवाय एकार्थसमवायान्यतर-सम्बन्धेन सत्तावत्वमिति तेषामाशयः।

**सिद्धान्तः**

परन्तु अनेकक्लृप्तनियमभङ्गापेक्षया अभावस्य आकाशत्ववत् अखण्डोपाधित्वकल्पने एव लाघवम्, न प्रमाणाभावः अयमभावः इति सर्वत्रानुगमव्यवहारस्यैव गमकत्त्वात् इति नव्यमतमरुग्रस्तं प्रतिभातीति सूचितम् दिनकरीकारैः आहु[66]रितिपदेन। अतः अभावत्वम् अखण्डोपाधिरेव इति वैशेषिकसिद्धान्तः।

**कणादरहस्ये पदार्थव्यवस्था-**




**निष्कर्षः**

पद्मनाभाचार्याः परममनीषिणः न्यायवैशेषिकदर्शनयोः अनितरसाधारणवैदुष्यम् आवहन्तः अतिदुरूहकाणादादिमहर्षिप्रभृतिग्रन्थहृदयम् अपि सम्यक् परिशील्य तत्र विद्यमानान् दुर्भेद्य-

संशयग्रन्थीन् अपि सुयुक्त्यादिभिः भेदयन्तः यथासरल-मन्यूनाधिक-रूपेण निष्कृष्टार्थप्रतिपादने सकलसुहृदयमनोरमां पाण्डितीं समादधत इति। प्रत्यक्षस्य प्रमाणान्तरानपेक्षित्वेन तत्प्रणीतग्रन्थपरिशीलन-चतुराणां विदुषामिदं सुप्रसिद्धमेव। एतेषां ग्रन्थाः नातिसरलाः नातिदुरूहाः, तथापि अपेक्षित-सर्वार्थप्रतिपादकाः इत्यत्र न संशीतिलेशः। तत्र तावत् नव्यप्राचीनन्यायवैशेषिक-मूर्धाभिषिक्त-ग्रन्थानाम् अतिसहजं सप्रमाणं विवेचनम् अतिरिच्य तत्र तत्र मणिकार-दीधितिकारप्रभृतयः सारल्यातिशयादिना स्वग्रन्थप्रसङ्ग-भङ्ग-भिया वा यान् विषयान् उपेक्षन्ते तानपि विषयानिमे सर्वेभ्यः दर्शनेभ्यः सङ्गृहीत्य स्फुटं व्याचक्षते इति अदृष्टचरं वैशिष्ट्यमेतेषां विद्यते। अतः इदं सर्वमवलोक्य निश्चयेनेदं वक्तुं पारयामः यत् एतेषां ग्रन्थानामनध्ययनेन कोऽपि पुरुषः न न्यायवैशेषिकयोः सर्वतः निश्चितार्थं सिद्धान्तमवगन्तुं पारयेदिति। तेषां ग्रन्थेषु अयं कणादरहस्यग्रन्थः वैशेषिक-मतप्रकाशकत्वेन प्रथितः अन्यतमः। अस्मिन् ग्रन्थे न केवलं स्वाभिमतपदार्थनिरूपणमपि तु अन्यादार्शनिकाभिमतपदार्थानां खण्डनं मतमतान्तराणामालोचनमपि वर्तते। अतः नातिसरलः नातिक्लिष्टः ग्रन्थः।

यद्यपि सेतुग्रन्थे एतैः बहुधा मतानि विमृष्टान्येव सन्ति तथापि अस्मिन् ग्रन्थे तद्ग्रन्थापेक्षया लघुरूपत्वच्छन्दोबद्धत्वादिवै-शिष्ट्यानां विद्यमानत्वेन क्वचित् प्रतियोगित्वाद्यनेकविचारा-णाम् अपूर्वेषामपि विचारणाच्चायं ग्रन्थः पार्थक्येनैव राराज्यते। अत्र ग्रन्थे यत्र मीमांसकमतम्, नव्यन्यायमतम्, अन्यदार्शनिकमतं वा विरुध्यते तत्र इमे ग्रन्थकृतः तेषां मतं तत्तद्ग्रन्थानुगुणं स्पष्टं प्रतिपाद्य, परं ततः स्वदर्शनाभिमतं सिद्धान्तं प्रतिपादयन्ति। यथा हि सप्तैव पदार्थाः इति महर्षेरभिमते स्वसिद्धान्ते अन्यदार्शनिकैः आक्षेपे विहिते तानि सर्वाणि अपि शक्तेरतिरिक्तत्वम्, तमसः अतिरिक्तत्वम्, वैशिष्ट्यस्याति-रिक्तत्वम्, अभावस्यानतिरिक्तत्वमित्यादीनि बहूनि मतानि खण्डयि-त्वातिसहजं दुरूहमपि काणादहृदयानुगुणं प्रतिपाद-याञ्चक्रुः।

**<u>सन्दर्भग्रन्थाः</u>**


१.ओक,कृष्णाजी गोविंद. (संपा.) १९१३: प्रथामावृत्ती. अमरकोशो-द्घाटनम्:. पुणे: लॉ प्रिंटिंग प्रेस.

२.कविराज,श्रीगोपीनाथ. (संपा.) १९२०: प्रथामावृत्ती. किरणावली-भास्करः. बनारस: गव्हर्मेंट संस्कृत लाइब्ररी.

३.कविराज, श्रीगोपीनाथ. (संपा.) १९२५: प्रथामावृत्ती. प्रशस्तपाद-भाष्यम्:. बनारस: चौखंबा संस्कृत सिरीज.

४.ताताचार्य, एन. एस. रामानुज. (संपा.) २०१२: प्रथामावृत्ती. कारिकावली-मुक्तावली-दिनकरीसहित राजीवोल्लासटीका: चेन्नई: श्री-श्री-श्रीमहालक्ष्मी मातृभूतेश्वर ट्रस्ट.

५.नारायणभट्ट. (संपा) १९३३: प्रथमावृत्ती. मानमेयोदयः मद्रासः थिकुन्हन राजा थियोसोफिकल सोसायटी आड्यार.

६.दीक्षित, पुष्पा. (संपा.) २०१०: प्रथमावृत्ती. प्रक्रियानुसारिपा-णिनीय-धातुपाठ:. नई दिल्ली: संस्कृतभारती मातामंदिर गली.

७.वैद्यनाथन,एन्. (संपा.) २००८: द्वितीयावृत्ती. तर्कसंग्रहदीपिका-प्रकाशिका बालप्रियाप्रसारनसहिता:. चेन्नई: श्री-श्री-श्रीमहालक्ष्मी मातृभूतेश्वर ट्रस्ट.

८.वैराग्यरतिविजय. (संपा.) २००७: प्रथामावृत्ती. मंगलवाद-संग्रहः. पुणे: प्रवचन प्रकाशन.

९.शास्त्री, गौरिनाथ.(संपा.) १९८१: प्रथामावृत्ती. किरणावली-रहस्यम्:. बनारस: सम्पूर्णानंद विश्वविद्यालय.

१०.शास्त्री, बदरीनाथ. (संपा.) १९३६: प्रथामावृत्ती. किरणावली-प्रकाशः. लखनउ: लखनउ युनिवर्सिटी.

११.स्वामी-योगीन्द्रानन्द. (संपा) १९७३: प्रथमावृत्ती. मानमनोहरः वाराणसी: षड्दर्शन प्रकाशन प्रतिष्ठान.

१२.हरिहर शास्त्री. (संपा) १९२७: प्रथमावृत्ती. न्यायलीलावतीः बनारसः चौखम्बा संस्कृत सीरीज

१३.हरिहर शास्त्री. (संपा) १९२७: प्रथमावृत्ती. न्यायलीलावती-कण्ठाभरणः बनारसः चौखम्बा संस्कृत सीरीज

१४.Jhā,Gaṇgānāth(Tr.) 1939. Gautama's Nyāyasūtras. Poona: Oriental Book Agency.

१५. Potter, Kārl H. (Ed.) 1995: 1st Edn. Encyclopedia Of Indian Philosophies Vol. II: The Tradition of Nyāya-Vaiśeṣika Upto Gaṅgeśa. Delhi: Motilāl Banārsidās.


**[1]पादट्टिपणी -**

[2] JHA, translation of Nyayasutras, १.२.१

[3] Potter, EIP, Vol. २, p. ४३

[4] वै.सू.चन्द्रा. वृत्ति बडोदा, वै.सू.व्या, मिथिला

[5] प्र.भा.से.पृ.१००-१०४

[6] मा. मेयो. पृ. १५०

[7] न्या. ली. पृ. ७६-७७

[8] न्या. ली. कण्ठा. पृ. ७९-८१

[9] स. प. पृ. ४४-४७

[10] मा. मनो, पृ. १३५- १३९

[11] प. त. नि. पृ. ७२-८८

[12] राद्धः = सिद्धः अन्त = निर्णयो यस्मात्। सिद्धनिर्णय इत्यर्थः। समौ सिद्धान्तराद्धान्तौ इति अमरकोशवचनात्। सिद्धान्ता एव मुक्ताः = मौक्तिकाः तेषां हारः = मुक्तावली। (हारः- ह्रियते मनो येन। हृ + घञ्) सिद्धान्तयुता माला इत्यर्थः।

[13] कणादस्य = अक्षपादस्य, रहस्यम् = गुह्यम्, हार्दम् इत्यर्थः।

[14] क.र.परि. ४२

[15] दिन.का.सं.२ व्याख्यानम्

[16] क.र.परि.१११

[17] क.र.परि.११२

[18] क.र.परि.११२

[19] क.र.परि.११३

[20] क.र.परि.११४

[21] क.र.परि.११५

22 क.र.परि.११६

23 अत्र द्रव्यम्, गुणः, कर्म च एते त्रयः पदार्थाः एव लक्ष्याः ज्ञेयाः। क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्। वै.सू.१.१.१५

24 तत्त्व. सं. श्लो. ५६४-५७४

25 न्या. सि. मु. पृ.

26 अत्र योगग्रहणं समवायसम्बन्धेन द्रव्यत्वं द्रव्यलक्षणमिति बोधयितुम्, कार्थसमवायादेः अन्यत्रापि सत्त्वात् इति। प्र. पा. भा. से. पृ. १४५

27 अत्र पृथिवी, जलम्, तेजः, वायुः एतानि चत्वारि द्रव्याणि। रूप-रस-गन्ध-स्पर्श-ङ्ख्या-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-ख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्काराः चतुर्विंशति गुणाः। त्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि। इति आदिपदेन बोध्याः।

28 प्र. पा. भा. पृ. पृ. १५

29 न्या. सि. मु. पृ.

30 प्र. पा. भा.पृ. २०

31 न्या. सि. मु. पृ.

32 प्र. पा. भा.पृ. २२

33 स. प. पृ. ६४

34 न्या. सि. मु. पृ. १३०

35 प्र. पा. भा.पृ. २४, २७

36 तच्चैकं विभु नित्यं च। त.सं.पृ.

37 अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि। वै. सू. २.२.६

38 भा.प. कारिका ४६

39 प.त.नि. पृ. २३

40 स. प. पृ. १९

41 न्या. वा. पृ. ३३६

42 प्र.पा.भा.पृ. ४७

43 त.कौ, पृ ३

44 न्या.सि.मु. पृ. १५३

45 प्र.पा.भा.पृ.५६

46 मा.मनो. पृ. ४८

47 स.प.पृ.४२

48 कि. पृ.३३

49 मुक्तावलीदिनकरी.पृ.५८

50 दिनकरी का.८. व्याख्यानम्।

51 दीधितिकारस्य मते कालिकसम्बन्धेन तेषामपि वृत्तित्वमेव।

52 प्र.पा.भा.से.पृ.११८

53 सि.च. पृ. ३

54 न्या.को.पृ.१७६-७७

55 सि.च. पृ. ३

56 विशेषो द्विविधोऽणुमहद्वृत्तिभेदादिति विभागसम्भवादिति चेन्न स्वतन्त्रेच्छस्य मुनेः नियोगपर्यनुयोगयोरनर्हत्वात्।रहस्यान्तरमत्रत्यं कणादरहस्ये। इति उल्लेखात् अयं ग्रन्थः अस्य सेतुटीकायाः प्राग्विनिर्मितः इति ज्ञायते। प्र.पा.भा.से.पृ.३५

57 इहेदमिति यतः कार्यकारणयोः स समवायः। वै.सू.७.२.२६

58 स.प.पृ.६१

59 सर्व.सं.पृ.२१७

60 प्र.पा.भा.से.पृ.८०

61 न्या.सि.मु.पृ.१३

62 न्या.सि.मु.पृ.१३

63 प्र.पा.भा.से.पृ.८०, क.र.परि.१९६

64 न्या.सि.मु.पृ.१२

65 दिनकरी, का. पृ.१२.व्याख्या

66 रामरुद्रीसहितदिनकरी पृ.७१